कर्कशाङ्गुलौ” रघुः । ६कठिनस्पर्शवति त्रि० अमरः ७क्रूरे ८निर्दये च त्रि० मेदि० । ९दुर्बोधे च “तर्के वा भृशकर्कशे मम समं लीलायते भारती” प्रसन्न० । १०अत्यन्ते च “तस्य कर्कशविहारसम्भवम्” रघुः कर्कशस्य भावः त्व । कर्कशत्व न० तल् कर्कशता स्त्री । ष्यञ् । कार्कश्य न० इमनिच् कर्कशिमन् पु० कर्कशभावे “नागेन्द्रहस्तास्त्वचि कर्कशत्वात्” कुमा० । “आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम्” माघः । कार्कश्यञ्च स्पर्शभेदः । “स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनाः” इत्यादिसुश्रुतोक्तेस्तस्य स्पर्शेन्द्रियग्राह्यता । स च पार्थिवगुणभेदः । अन्यद्रव्ये तु कार्कश्यव्यवहारो भाक्तः । सुश्रुतोक्तेषु चिकित्सोपयोगिविंशतिगुणेषु ११गुणभेदे ते च गुणा यथा

“अत ऊर्द्ध्वं प्रवक्ष्यामि गुणानां कर्म्मविस्तरम् । कर्म्मभिस्त्वनुमीयन्ते नानाद्रव्याश्रया गुणाः । ह्लादनः स्तम्भनः शीतो मूर्च्छातृट्स्वेददाहजित् । उष्णस्तद्विपरीतः स्यात् पाचनश्च विशेषतः । स्नेहमार्दवकृत् स्निग्धो बलवर्णकरस्तथा । रूक्षस्तद्विपरीतः स्याद्विशेषात् स्तम्भनः खरः । पिच्छिलो जीवनो बल्यः सन्धानः श्लेष्मलो गुरुः । विशदो विपरीतोऽस्मात् क्लेदाचूषणरोपणः । दाहपाककरस्तीक्ष्णः स्रावणो मृदुरन्यथा । सादोपलेपबलकृद् गुरुस्तर्पणबृंहणः । लघुस्तद्विपरीतः स्याल्लेखनो रोपणस्तथा । दशाद्याः कर्म्मतः प्रोक्तास्तेषां कर्मविशेषणैः । दशैवान्यान् प्रवक्ष्यामि द्रवादींस्तान्निबोध मे । द्रवः प्रक्लेदनः सान्द्रः स्थूलः स्याद्बन्धकारकः । श्लक्ष्णः पिच्छिलवज्ज्ञेयः कर्कशो विशदो यथा । सुखानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुः । दुर्गन्धो विपरीतोऽस्माद्धृल्लासारुचिकारकः । सरोऽनुलोमनः प्रोक्तो मन्दो यात्राकरः स्मृतः । व्यवायी चाखिलं देहं व्याप्य पाकाय कल्पते । विकासी विकसन्नेवं धातुबन्धान् विमोक्षयेत् । आशुकारी तथाशुत्वाद्धावत्यम्भसि तैलवत् । सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतस्स्वनुसरः स्मृतः । गुणा विंशतिरित्येवं यथावत् परिकीर्त्तिताः” । १२दृश्चिकालीवृक्षे स्त्री राजनि०

**कर्कशच्छद** कर्कशः छदः पत्रमस्य । (शेओड़ा) १शाकोटवृक्षे शब्दमा० २पटोले च त्रिका० कर्कशदलोऽप्यत्र । ३कोषातक्यां स्त्री टाप् राजनि० । कर्कशदला दुग्धवृक्षे राजनि० ।

**कर्कशवाक्य** न० कर्म्म० । निष्ठुरवाक्ये परुषवाक्ये शब्दर० ।

**कर्कशिका** स्त्री कर्कश–संज्ञायां कन् अत इत्वम् । वनकोलिवृक्षे रत्नमा० । [मिश्रितसक्तुषु हारा० ।

**कर्कसार** न० कर्कः कठिनः सारोऽस्य । करम्भे दधि-

**कर्कारु** पु० कर्कं हासं श्वेततामृच्छति ऋ–उण् । १कुष्माण्डे । (पाङ्कुमडा) । अमरः तस्य पक्वे फले श्वेततायुक्तत्वात् तथात्वम् । अस्य स्त्रीत्वमपि “कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः । पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्” इति भावप्र० उक्तेः । २एर्वारुकर्कारुकुष्माण्डप्रभृतीनां तैलानि मधुराणि” सुश्रु० तयोर्भेदनिर्देशात् विशेषकुष्माण्ड एव एर्कारुरिति बोध्यम् । “एर्वारुकं सकर्कारु पक्वं स्यात् कफवातकृत् । सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलम् । सक्षारं मधुरञ्चैव शीर्णवृन्तं कफापहम् । भेदनं दीपनं हृद्यमानाहाष्ठीलनुल्लघुः वपुः” । इति कर्कारोः “पित्तघ्नं तेषु कुष्माण्डम् बालं मध्यं कफावहम् । पक्वं लघूष्णं क्षारं च दीपनं वस्तिशोधनम्” । इति कुष्माण्डस्य च भेदेन गुणभेदोक्तेस्तयोर्भेदः

**कर्कारुक** पु० कर्कं हासमृच्छति ऋ–उकञ् ईत० । कालिन्दवृक्षे (खेँडो) हारा० कालिन्दशब्दे गुणादि वक्ष्यते

**कर्कि** पु० कर्क–इन् । कर्कटराशौ । “कर्किमीनधनुर्भ्याञ्च हरिः कीटघटेन च” ज्यो० त० ।

**कर्की** कर्क–हासे अच् गौरा० ङीष् । कुष्माण्ड्याम् (कांकुड)

**कर्कोतन** पुं न० रत्नविशेषे । “रत्नान्याह गरुड़पुराणे” आ० त० “तेषु रक्षोविषव्यालव्याधिघ्नान्यघहानि च । प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च । वज्रं मुक्तामणयः पद्मरागाः समरकताः प्रोक्ताः । अपि चेन्द्रनीलमणयो वैदूर्य्याः पुष्परागाश्च । कर्केतनकुरुविल्वौ रुधिराक्षसमन्वितं तथा स्फटिकम् । विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः इत्युद्दिश्य । “वायुर्नखान् दैत्यपते र्गृहीत्वा विक्षेप मासाद्य वनेषु हृष्टः । ततः प्रसूतं पवनोपपन्नं कर्केतनं पूज्यतमं पृथिव्याम् । वर्णेन तद्रुधिरशोभमधुप्रकाशमाताम्रपीतदहनोज्ज्वलितं विभाति । नीलं पुनः सुलसितं परुषं विभिन्नं व्याध्यादिदोषहरणेन न तद्विभाति । स्निग्धा विशुद्धाः समरागिणश्च आपीतवर्णा गुरवो विचित्राः । त्रासव्रणव्याधिविवर्जिताश्च कर्केतनास्ते परमाः पवित्राः । पत्रेण काञ्चनमयेन तु वेष्टयित्वा हस्ते गलेऽथ धृतमेतदतिप्रकाशम् । रोगप्रणाशनकरं कलिनाशनञ्च आयुष्करं कुलकरञ्च सुखप्रदञ्च । एवंविधं बहुगुणं मणिमावहन्ति कर्केतनं शुभमलं कतरे नरा ये । ते पूजिता बहुधना बहुबान्धवाश्च नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति । एके पिनद्ध-